दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लप्रतिपदा
श्रावण 28 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-8 ■ वर्ष-5 ■ अङ्क-294 | 1 | अगस्त 13, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 वैदेशिक-अंशदान-(विनियमन)-संशोधन-विधेयकम्, २०२६ संयुक्त-संसदीय-समित्यै प्रेषितम्

3 HP NEWS - पदोन्नति-प्रकरणे सहस्रशः शिक्षकेभ्यः महती साहाय्यता, विधि-विभागेन अस्य निर्णयस्य कार्यान्वयनाय दत्ता सम्मतिः

8 उप्र. कूटौषधि-प्रकरणे एफ़एसडीए-संस्थायाः महती प्रक्रिया, चतुर्णां विरुद्धम् एफ.आई.आर. पञ्जीकृता

## सहकारिता-क्षेत्रस्य संवर्धनाय वित्तीयानुदान-वृद्धि-विधेयकं संसदा अनुमोदितम्

**हिमसंस्कृतवार्ता।** लोकसभया वैदेशिक-अंशदान-संशोधन विधेयकम् षड्विंशत्यधिक-द्विसहस्रतमं विस्तृत-परीक्षणाय संयुक्त-संसदीय समितये प्रेषितम्। एतत् विधेयकं दशाधिक-द्विसहस्रतमस्य वर्षस्य मूलाधिनियमस्य संशोधनार्थम् आनीतम् अस्ति। अस्य विधेयकस्य मुख्योद्देश्यं वैदेशिक-अनुदानानां प्रयोगं अधिकाधिकं पारदर्शिकम् उत्तरदायित्वपूर्णं च विधातुम् अस्ति। गृह-राज्यमन्त्री नित्यानन्द रायः व्यापक परामर्शार्थं एतं विधेयकं उभयोः सदनयोः सांसदयुक्तायाः जे०पी०सी०-समित्याः पार्श्वे प्रेषयितुं प्रस्तावम् उपस्थापितवान्। तेनोक्तं यत् अस्यां समितौ लोकसभायाः एकविंशति-सदस्याः अथ च राज्यसभायाः दश-सदस्याः भविष्यन्ति। रायः असूचयत् यत् एषा समितिः शीतकालीन सत्रस्य प्रथम-सप्ताहस्य अन्तिम दिनाङ्क यावत् स्वकीयं वृत्तं सदने उपस्थापयिष्यति।



## पूर्व-राष्ट्रपतिनः रामनाथ कोविन्दस्य ट्रायम्फ् ऑफ द इण्डियन् रिपब्लिकः माइ लाइफ, माइ स्ट्रगल्स्' इति शीर्षक-युक्तस्य पुस्तकस्य विमोचनमकरोत् प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी यूनाम् आह्वानम् अकरोत् यत् ते स्वीय-प्रेरणास्रोतसां आत्मचरितानि पठेयुः, सहैव अन्तर्जालीयेऽस्मिन् युगे जीवनस्य लघु-मार्गान् परिहरेयुः। तेन विकसित-भारतस्य सङ्कल्पं अग्रे नेतुम् कर्मठ-युवकानाम् अविरत-आवश्यकतायाः उपरि अपि बलम् दत्तम्। सः तादृशस्य वंशस्य निर्माणाय आह्वानम् अकरोत्, यः बाधाः परिहार्य राष्ट्रिय-आत्मनिर्भरतायाः मार्गे धैर्यपूर्वकम् अग्रे सरेत् । प्रधानमन्त्री नवदेहल्यां पूर्व-राष्ट्रपतिनः रामनाथ कोविन्दस्य ट्रायम्फ् ऑफ द इण्डियन् रिपब्लिकः माइ लाइफ, माइ स्ट्रगल्स्' इति शीर्षक-युक्तस्य पुस्तकस्य विमोचनावसरे एतत् प्राख्यापयत् । प्रधानमन्त्री मोदी देशस्य युव-वंशं रामनाथ कोविन्दस्य जीवन-यात्रां तस्यैव शब्देषु ज्ञातुं अथ च तस्य लेखनानि अनुभवांश्च पठितुम् आग्रहमकरोत्। सः अकथयत् यत् महात्मा गान्धी, बाबासाहेब अम्बेडकरः, ज्योतिबा फुले, सावित्रीबाई फुले इत्यादयः महापुरुषाः तादृशस्य पुनर्मानित भारतस्य स्वप्नम् अपश्यन्, यत्र दरिद्रः वञ्चितः नागरिकः उच्चतमं पदं प्राप्नुयादिति।

## सर्वकारः सर्वेषु विषयेषु चर्चायै सन्नद्धः, संसद्-सञ्चालनाय विपक्षात् विहितः आग्रहः गृहमन्त्री अमितशाहः

केन्द्रीय-गृहमन्त्री अमित शाहः प्रावोचत् यत् सर्वकारः छात्र-विषयमधिकृत्य कस्मिंश्चिदपि विषये संसदि चर्चायै तथा च प्रश्नानाम् उत्तराणि च दातुं पूर्णतया सन्नद्धो वर्तते। संसद्-प्राङ्गणे वार्ताहरैः सह सम्भाषमाणः शाहः न्यगादीत् यत् सर्वकारस्य पार्श्वे गोपयितुं किमपि नास्ति, स च विचार-विमर्शाय तत्परो विद्यते। अपरतः लोकसभायां विपक्षस्य नेता राहुल गान्धी अवदत् यत् नीट्-प्रदर्शनकारि-छात्रान् विरुध्य आरक्षकाणां विरुद्धाचरणम् अधिकृत्य विपक्षः सर्वकारात् उत्तरं याचते। संसद् परिसरे वर्ताहरैः सह संवादक्रमे असौ प्रोक्तवान् यत् विपक्षस्य रुचिः केवलं गृहमन्त्रिणः वक्तव्ये नास्ति, अपितु सर्वकारस्य उत्तरदायित्व निर्धारणे वर्तते ।

## हर घर तिरङ्गा इत्यभियानं गतिं भजते, उपराष्ट्रपतिः सि०पी० राधाकृष्णन् अवदत् यत् वन्दे मातरम् इति भावना राष्ट्रियात्मनः सशक्तीकरणं करोति

उपराष्ट्रपतिः सी. पी. राधाकृष्णनवर्यः अवदत् यत् वंदे मातरम् इत्यस्य भावेन भारतस्य स्वातन्त्र्य-सङ्घर्षं प्रेरितम्, अद्यत्वे अपि राष्ट्रस्य परिचयं सुदृढम् करोति। राष्ट्रगीतस्य सार्धेक-वर्षाणां पूर्त्यवसरे संस्कृति-मन्त्रालयेन आयोजिते हर् घर् तिरङ्गा द्विचक्रिकायान- यात्रायां प्रतिभागिनः सम्बोधयन् सः एतत् उक्तवान्। उपराष्ट्रपतिः अवदत् यत् वंदे मातरम् इत्यस्य शब्दैः देशभक्तिः प्रज्वलितं तथा च औपनिवेशिकशासनस्य विरुद्धं युद्धे प्रदेशेषु, भाषासु, धर्मेषु, पृष्ठभूमौ च जनानां ऐक्यम् आनीतम्। सः वीर सावरकरस्य, नेताजी-सुभाष-चन्द्र-बोसस्य, तिरुपुर-कुमारस्य इत्यादीनां स्वातन्त्र्ययोद्धानां त्यागस्य स्मरणं कृत्वा, तेषां साहसेन वंदे मातरम् इत्यस्य चैतन्यं जीवितं स्थापितम् इति उक्तवान्।

## अद्यतनीयं सुभाषितम्

**नाकाले म्रियते जन्तुः, विद्धः शरशतैरपि।**
**कुशाग्रेणैव संस्पृष्टः, प्राप्तकालो न जीवति॥**
(हितोपदेश, सुहृद्भेद- १७)

अर्थात्- यदि समय न आया हो तो सैकड़ों बाणों के विद्ध जाने से भी प्राणी नहीं मरता है और जो काल आ जाये तो केवल कुशा की नोंक से छूते ही मर जाता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## नेशनल ए. आई. स्किलिङ्ग् इनिशियेटिव् इत्यस्य प्रथमे चरणे प्रायः सपाद-षष्ठी-सहस्राधिकानि नामाङ्कनानि जातानि -डा. एल्. मुरुगनः



सर्वकारेण सूचितं यत् नैशनल ए. आई. स्किलिङ्ग् इनिशियेटिव् इत्यस्य प्रथमे चरणे प्रायः सपाद-षष्ठी-सहस्राधिकानि नामाङ्कनानि जातानि। सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन् वर्यः लोकसभायां लिखिते प्रत्युत्तरे अवदत् यत् आहत्य विंशत्यधिक-षट्शताधिक-चतुःसहस्रं यावत् प्रतिभागिनः प्रथमस्य चरणस्य माड्यूल्-द्वयं सम्पन्नं कृतवन्तः। सः अग्रे अवदत् यत् द्विपञ्चाशदधिक-पञ्चशतं यावत् प्रतिभागिनः कार्यक्रमस्य प्रथमस्य चरणस्य चतुर्णां माड्यूल्-विशेषान् सम्पूर्णं कृतवन्तः। पाठ्यक्रम, माड्यूल्, पाठ्यक्रमस्य अवधिः इत्यादीनां द्वितीयस्य चरणस्य विवरणानि अन्तिमावस्थायां सन्ति।

# भारतीय-रेलवे-मन्त्रालयेन चतुष्पथीय-मार्ग-उर्ध्व-सेतोः

## निर्माणाय त्रिपञ्चाशदधिकैकशत-कोटिरुप्यकाणां परियोजना स्वीकृता



भारतीय-रेलवे-मन्त्रालयेन पश्चिम-रेलवे-मण्डलस्य गेरातपुर-अहमदाबाद-खण्डे चतुष्पथीय-मार्ग-उर्ध्व-सेतोः निर्माणाय त्रिपञ्चाशदधिकैकशत-कोटिरुप्यकाणां परियोजना स्वीकृता। रेलवे-मन्त्रालयेन सूचितं यत् एषा परियोजना अम्ब्ला-कार्यस्य अन्तर्गतम् स्वीकृता अस्ति। मन्त्रालयेन स्पष्टीकृतं यत् अस्य रेल-सेतु-भागस्य आहत्य दैर्ध्य षडाधिकैकशत-मीटरमितं भविष्यति।

## सांख्यिकी-प्रोग्राम-कार्यान्वयन-मन्त्रालयेन अधिसूचितेन प्रदत्तानुगुणं ग्रामीण-क्षेत्रेषु महर्घता वर्धित्वा ४.८४ प्रतिशतं, यद्यपि नगरीय-क्षेत्रेषु ३.९६ प्रतिशतं जाता

अखिल-भारतीय-उपभोक्तृ-खाद्य-मूल्य-सूचकाङ्क-आधारिता खाद्य-महर्घता-दरः गते मासे वर्धित्वा ५.५२ प्रतिशतं स्थिता, या गत-जून-मासे ५.३२ प्रतिशतं आसीत्। प्रदत्तानुसारं जुलाई-मासे महर्घता-वर्द्धनस्य प्रमुखं कारणं व्यक्तिगत-परिचर्या, सामाजिक-सुरक्षा, उपाहारगृह-आवास-सेवाः, खाद्य-पेय-पदार्थाः तथा च मादक-द्रव्याणां मूल्येषु वृद्धिः आसीत्। अखिल-भारतीय-संयुक्त-स्तरे सर्वाधिक-महंगाई-युक्तासु प्रमुख-वस्तुषु रजतं, स्वर्णं, हीरकं, प्लैटिनम-आभूषणानि, आर्द्रकम् (अदरक), लशुनम्, पलाण्डुः (प्याज़) च समाविष्टाः सन्ति। अपरपक्षे मोटर-कार, जीप, आलुकम्, भिण्डिका, कलायः (मटर), वार्ताकी/रक्तवार्ताकम् (टमाटर) इत्यादि-पदार्थानां मूल्येषु न्यून-वृद्धिः अभवत्।

## 'एका ओषधिः, एकं मानकम' इति प्राथमिक्या पारम्परिक-औषधीनां गुणवत्ता विश्वसनीयता च सुदृढा भविष्यति: आयुषमन्त्री प्रतापरावजाधवः

आयुषमन्त्री प्रतापरावजाधवः अवदत् यत् 'एका ओषधिः, एकं मानकम' इति उपक्रमस्य उद्देश्यं पारम्परिक-औषधीनां गुणवत्तां विश्वसनीयतां च सुदृढां करणम् अस्ति। सः अद्य 'एका ओषधिः, एकं मानकम' इति उपक्रमस्य कार्यान्वयन-सम्बद्धस्य सन्धि-पत्रस्य नवीनीकरण-अवसरे भाषमाणः आसीत्। आयुष-मन्त्रालयस्य भारतीय-चिकित्सा-होम्योपैथी-औषधसंहिता-आयोगेन तथा च भारतीय-औषधसंहिता-आयोगेन अस्य सन्धेः-ज्ञापनस्य (MoU) नवीनीकरणं कृतम्। श्रीजाधवः अवदत् यत् एषः उपक्रमः भारतस्य समृद्ध-जैव-विविधतायाः पारम्परिक-चिकित्सा-विरासतस्य च संरक्षणे योगदानं प्रदास्यति। अनेन औषधीय-पादपानाम्, पारम्परिक-औषधीनां तथा च तासां गुणवत्ता-मानकानां क्षेत्रे एकस्य विश्वसनीय-वैश्विक-मानक-निर्धारकस्य रूपेण भारतस्य स्थितिः सुदृढा भविष्यति।

# वैदेशिक-अंशदान-(विनियमन)-संशोधन-विधेयकम्, २०२६ संयुक्त-संसदीय-समित्यै प्रेषितम्



लोक सभा वैदेशिक-अंशदान-(विनियमन)-संशोधन-विधेयकम्, २०२६ इति विचार-विमर्शार्थं संयुक्त-संसदीय-समित्यै प्रेषितवती। अस्य विधेयकस्य उद्देश्यं वैदेशिक-अंशदान-(विनियमन)-अधिनियमम्, २०१० इत्यस्मिन् पुनः संशोधनकरणम् अस्ति। विधेयकस्य लक्ष्यं वैदेशिक-अंशदानस्य उपयोगं अधिकं पारदर्शिनं उत्तरदायिनं च करणम् अस्ति। गृह-राज्य-मन्त्री नित्यानन्द-रायः व्यापक-विचार-विमर्शार्थं विधेयकम् उभयोः सदनयोः सदस्यैः युक्तं संयुक्त-संसदीय-समितिं प्रति प्रेषयितुं प्रस्तावं प्रस्तुतवान्। सः अकथयत् यत् समितौ अध्यक्षेण मनोनीताः लोक सभायाः एकविंशतिः सदस्याः, सभापतिना मनोनीताः च राज्य सभायाः दशसदस्याः भविष्यन्ति। श्रीरायः अकथयत् यत् समितिः शीतकालीन-सत्रस्य प्रथम-सप्ताहस्य अन्तिम-दिवस यावत् सदनाय स्वकीयं प्रतिवेदनं प्रस्तोष्यति।

## देशे प्रायः ४४० अन्तरिक्ष-प्रौद्योगिकी-नवोद्यमाः (स्टार्टअप) पञ्जीकृताः: केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः



केन्द्रीयमन्त्री डॉ. जितेन्द्रसिंहः लोक सभायाम् अवदत् यत् देशे प्रायः ४४० अन्तरिक्ष-प्रौद्योगिकी-नवोद्यमाः पञ्जीकृताः सन्ति। एकस्मिन् लिखित-उत्तरे डॉ. सिंहः अवदत् यत् भारतीय-राष्ट्रीय-अन्तरिक्ष-संवर्धन-एवं-प्राधिकरण-केन्द्रेण (IN-SPACe) ५२ अ-सर्वकारीय-संस्थाभ्यः विविध-अन्तरिक्ष-गतिविधिभ्यः ११३ अधिकार-पत्राणि प्रदत्तानि। एतेषु १८ अ-सर्वकारीय-संस्थाः नवोद्यमाः सन्ति। श्रीजितेन्द्रसिंहः अवदत् यत् अन्तरिक्ष-क्षेत्रस्य उदारीकरणस्य अनन्तरं सर्वकारेण उपग्रह-निर्माण-प्रक्षेपण-सेवास्वपि, अधोप्रवाह-अनुप्रयोगेषु (डाउनस्ट्रीम), अन्तरिक्ष-आधारित-प्रौद्योगिकीषु च नवोद्यमानां सहभागितां वर्धयितुं बहूनि पदानि उत्थापितानि। भारतीय-राष्ट्रीय-अन्तरिक्ष-संवर्धन-एवं-प्राधिकरण-केन्द्रम्, भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्गठनस्य (ISRO) उपलब्ध-प्रौद्योगिकीनाम् उद्योगेभ्यः हस्तान्तरणे सौकर्यं प्रददाति। अद्यावधि ११८ प्रौद्योगिकी-हस्तान्तरण-सन्धिषु हस्ताक्षराणि कृतानि सन्ति।

**क्रीडावार्ता**

# अमरीका-देशस्य सेन्ट्-लुइस्-नगरे आयोज्यमानस्य सिंक्फील्ड्-चषकस्य द्वितीय-चक्रे भारतीय-ग्रैण्डमास्टर् आर० प्रज्ञानन्दः जवाखिर्-सिन्दारोव् इत्येतं पराजितवान्



अमरीका-देशस्य सेन्ट्-लुइस्-नगरे आयोज्यमानायाः सिंक्फील्ड्-चषकस्य द्वितीय-चक्रे भारतीय-ग्रैण्डमास्टर् आर० प्रज्ञानन्दः जवाखिर्-सिन्दारोव् इत्येतं पराजितवान्। ग्रैण्ड् चेस् टूर् इत्याख्यायाः एतस्याः शृङ्खलायाः उपान्त्य-स्पर्धायाम् एषा तस्य प्रथमा विजयश्रीः अस्ति। सम्पूर्ण-क्रीडायां प्रज्ञानन्दः अत्युज्वल-प्रदर्शनं विधाय, अन्ततः च साम्यावस्थां विजय-स्थितौ परिणतवान्।

## राष्ट्रमण्डल-स्पर्धा

राष्ट्रमण्डल-स्पर्धायाम् भारतीय-दलेन नाइजिरियायाः लागोसनगरे तृतीयदवसे स्वायत्तीकृतानि पञ्चपदकानि

## केंद्रीय-माध्यमिक-शिक्षा-बोर्डस्य (CBSE) द्वादश-कक्षायाः पूरक-परीक्षायाः २०२६ वर्षायाः परिणामः घोषितः

केंद्रीय-माध्यमिक-शिक्षा-बोर्डेन (CBSE) ह्यः द्वादश-कक्षायाः पूरक-परीक्षायाः २०२६ वर्षायाः परिणामः घोषितः। छात्राः स्वकीयं परिणामं 'डिजीलॉकर-परिणाम-पोर्टल' (DigiLocker Result Portal) `results.digilocker.gov.in` इत्यत्र द्रष्टुं शक्नुवन्ति।

## देशे जुलाई-मासे खुदरा-मुद्रास्फीतिः वर्धित्वा ४.४५ प्रतिशतं जाता



देशे जुलाई-मासे खुदरा-मुद्रास्फीतिः वार्षिक-आधारेण वर्धित्वा ४.४५ प्रतिशतं जाता। विशेषतः उल्लेखनीयम् अस्ति यत् खुदरा-मुद्रास्फीति-दरः सततं द्वितीय-मासे भारतीय-रिजर्व-बैंक-संस्थायाः चत्वारि प्रतिशतस्य लक्ष्यात् उपरि आसीत्। अस्मिन् वर्षे जुलाई-मासे मुद्रास्फीति-दरः जून-मासस्य ४.३८ प्रतिशतस्य तुलनायां किञ्चित् अधिका आसीत्। खाद्य-वस्तूनां मूल्यानि उच्चानि स्थित्वा मुद्रास्फीतेः उपरि दाबं निर्मितवन्ति। नूतनायाम् २०२४-आधार-वर्षीय-उपभोक्तृ-मूल्य-सूचकाङ्क (CPI) शृङ्खलायाम् एषा अद्यावधि सर्वोत्तमा मुद्रास्फीति-दरः अस्ति।

# HP NEWS - पदोन्नति-प्रकरणे सहस्रशः शिक्षकेभ्यः महती साहाय्यता, विधि-विभागेन अस्य निर्णयस्य कार्यान्वयनाय दत्ता सम्मतिः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य सहस्रशः जे.बी.टी. शिक्षकाणां मुख्यशिक्षकाणां च पदोन्नतिलाभं प्राप्तुं मार्गः प्रशस्तः दृश्यते। राज्यस्य विधिविभागेन शिक्षाविभागाय सम्मतिः दत्ता यत् मुख्यशिक्षक- पदोन्नत्या सम्बद्धे प्रकरणे हिमाचलप्रदेश- उच्च- न्यायालयस्य निर्णयः प्रवर्तितः क्रियेत्। विभागेन स्वीकृतं यत् वर्त्तमान-नियुक्ति-पदोन्नति-नियमेषु मुख्यशिक्षकस्य पदम् एकं पूर्ण-पदोन्नतिपदम् अस्ति अस्य पदस्य नियुक्तेभ्यः कर्मचारिभ्यः वेतननिर्धारणेन सह सर्वे पदोन्नति-लाभाः दातव्याः। एतत् प्रकरणं 'CWP' सङ्ख्या ५५४५/२०२२ गोपालकृष्णः विरुद्धं राज्यसर्वकारः इत्यनेन सम्बद्धम् अस्ति, अस्मिन् प्रदेश- उच्च-न्यायालयः २६ जून २०२५ दिनाङ्के निर्णयं श्रावितवान् आसीत्। विधिविभागेन स्वकीयायां विस्तृतटिप्पण्याम् एतत् उक्तम्- अस्य निर्णयस्य कार्यान्वयनमधिकृत्य शिक्षाविभागेन विधि-विभागात् परामर्शः याचितः आसीत्। अधुना विधि-विभागेन स्वकीयायां विस्तृत-टिप्पण्यां स्पष्टीकृतं यत् न्यायालयस्य निर्णयस्य प्रवर्तनमेव उचितं भविष्यति। विधिविभागेन नियुक्ति-पदोन्नति-नियमानाम् उल्लेखं कुर्वता उक्तं यत् मुख्य-शिक्षकस्य पदं १०० प्रतिशतं पदोन्नतेः माध्यमेन पात्र-जे.बी.टी. शिक्षकेभ्यः पूर्यते। अतः एतत् केवलं पदस्थापनम् अथवा पदनामपरिवर्तनं मन्तुं न शक्यते। विभागस्य अनुसारं यदा नियमाः स्वयं एतत् पदं पदोन्नतिरूपेण परिभाषितं कुर्वन्ति, तर्हि एतेन सम्बद्धाः सर्वे सामान्याः लाभाः अपि कर्मचारिभ्यः लब्धव्याः।

### नियमेषु वेतननिर्धारणं, पदोन्नतिवृद्धिः अन्ये सेवालाभाश्च सम्मलिताः-

एतेषु वेतननिर्धारणं, पदोन्नतिवृद्धिः अन्ये सेवालाभाश्च सम्मलिताः सन्ति। विधिविभागेन उक्तं यत् वित्तीय-नियमानाम् 'FR-22' इत्यस्य अन्तः उच्चपदे पदोन्नत्यां सत्यां कर्मचारी वेतननिर्धारणस्य पदोन्नति-वृद्ध्याश्च अधिकारी भवति। एते लाभाः केवलं कार्यपालिकायाः निर्देशानाम् आधारेण रोधयितुं न शक्यन्ते। यद्यपि जे.बी.टी. शिक्षकस्य मुख्यशिक्षकस्य च वेतनमाने समाने स्तः, परन्तु मुख्यशिक्षकस्य पदम् अधिकानां दायित्वानां पदम् अस्ति। तादृशे पदोन्नतेः उद्देश्यं कर्मचारिणः प्रोत्साहितुं तेषाम् अतिरिक्तानां दायित्वानां मान्यतां दातुम् अस्ति।

### प्रशासनिकनिर्देशाः नियुक्ति- पदोन्नतिनियमान् परिवर्तयितुम् न शक्नुवन्ति- विधिविभागः

विधिविभागेन स्पष्टीकृतं यत् प्रशासनिक-निर्देशाः नियुक्ति-पदोन्नति-नियमान् परिवर्तयितुं न वा तेषां प्रभावं परिसीमितं कर्तुं शक्नुवन्ति। यदि सर्वकारः भविष्ये मुख्यशिक्षकपदं पदोन्नतेः स्थाने 'प्लेसमेंट' आधारेण पूरयितुम् इच्छति, तर्हि अस्य कृते पूर्वं नियुक्ति-पदोन्नतिनियमेषु विधिवत् संशोधनं करणीयं भविष्यति। विभागेन उक्तं यत् यावत् नियमेषु संशोधनं न भवति, तावत् वर्त्तमान- प्रावधानमेव प्रवर्तितं भविष्यति पदोन्नत्या सम्बद्धाः लाभाः कर्मचारिभ्यः दातव्याः भविष्यन्ति। विधिविभागेन स्वकीयनिष्कर्षे उक्तं यत् उच्च- न्यायालयस्य निर्णयम् अग्रे आह्वानेन कस्यापि सार्थकपरिणामस्य आगमनाय सम्भावना नास्ति। अतः शिक्षा-विभागेन निर्णयस्य कार्यान्वयनस्य दिशि आवश्यकानि पदानि गृहीतव्यानि। अस्यामेव शृङ्खलायां शिक्षासचिवस्य पक्षतः विद्यालय- शिक्षा- निदेशालयं प्रति पत्रं प्रेषयित्वा प्रकरणे आवश्यककार्यविधिं कर्तुं निर्देशाः दत्ताः सन्ति।

# हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषदा उपनिदेशक- प्रारम्भिकशिक्षायै समर्पितं ज्ञापनम्



### टी.जी.टी. संस्कृतशिक्षकाणां वरिष्ठतासूच्याः मिड-डे-मील-प्रभारस्य च विषये न्यायस्य याचना

हिमसंस्कृतवार्ताः- नाहनम्। हिमाचल- राजकीय- संस्कृत- शिक्षक-परिषदः एकेन प्रतिनिधिमण्डलेन उपनिदेशक- प्रारम्भिक- शिक्षा (नाहनम्, सिरमौर-जनपदः) महोदयाय स्वकीयानां न्यायानुमोदितानां मागनानां विषये एकं ज्ञापनं समर्पितम्। परिषदा टी.जी.टी. संस्कृतशिक्षकाणां ज्येष्ठतासूच्याः पृथक्करणम्, मध्याह्न- भोजन- प्रभारस्य न्यायसङ्गतं वितरणम्, तथा च प्रलम्बितायाः सेवापुष्टिसूच्याः यथाशीघ्रं प्रकाशनं याचितम्। ज्ञापन-समर्पण-काले परिषदः राज्योपाध्यक्षः वेदः पराशरः, राज्यसङ्गठनसचिवः दिनेशः शर्मा, विभागसंयोजकः विनोदः गौतमः च विशेषरूपेण उपस्थिताः आसन्।

**ज्ञापने उत्थापिताः प्रमुखाः विषयाः-**

**पृथक्-ज्येष्ठतासूच्याः निर्माणम्-** टी.जी.टी. संस्कृतशिक्षकाणां ज्येष्ठतासूची सी. एण्ड. वी. संवर्गात् पृथक् कृत्वा टी.जी.टी. संवर्गस्य अन्तः निर्मीयताम् तथा च एषा सूची यथाशीघ्रं निदेशालयं प्रति प्रेषणीया। प्रतिनिधिमण्डलेन एतेषु विषयेषु विस्तारेण चर्चां कर्तुम् उपनिदेशक-महोदयेन सह उपवेशनस्य अनुकूलसमयस्य प्रदानाय अपि अनुग्रहः कृतः।

**मध्यान्हभोजन-प्रभारे रोटेशन-प्रक्रिया न्यायश्च-** विभागेन सम्प्रति निर्गतेषु आदेशेषु मध्याह्न- भोजनस्य प्रभारः केवलं शास्त्रीशिक्षकाणां नाम्नि निर्दिष्टः अस्ति, येन सम्पूर्ण-सेवाकाले अयं गुरुतरः कार्यभारः केवलं तेषामेव उपरि समागतः। परिषदा स्पष्टीकृतं यत् अयं प्रभारः अतीव संवेदनशीलः अस्ति, येन शिक्षकेषु मानसिकः दबावः भवति। अन्य- टी.जी.टी. संवर्गस्य शिक्षकाणाम् इव शास्त्रीशिक्षकाणाम् कृते अपि प्रतिद्विवर्षानन्तरं अस्य प्रभारस्य परिवर्तनस्य नियमः लागू क्रियताम् तथा च अन्यवर्गीयशिक्षकाणाम् अपि अस्मिन् अनिवार्यरूपेण समावेशः क्रियताम्।

**सेवापुष्टि-सूच्याः प्रकाशनम्-** बहुकालात् शास्त्रीशिक्षकाणां सेवापुष्टिसम्बन्धिनी सूची प्रकाशिता नास्ति। परिषदा सविनयं निवेदितं यत् शिक्षकाणां सेवापुष्टिं कारयित्वा तस्याः सूची यथाशीघ्रं प्रकाशिता भवेत्।

**परिषदः वक्तव्यम्-** परिषदः पदाधिकारीभिः उक्तं यत् हिमाचल- राजकीय- संस्कृत- शिक्षक- परिषद् राज्ये गुणवत्तापूर्णशिक्षायाः, छात्राणां सर्वाङ्गीणविकासस्य च कृते पूर्णरूपेण प्रतिबद्धा अस्ति। सिरमौर- जनपदस्य सर्वे संस्कृतशिक्षकाः अनुशासनपूर्वकं स्व-स्व-कर्तव्यानां निर्वहणं कुर्वन्तः सन्ति। यदि विभागः एतासु न्यायानुमोदितासु मागनासु सहानुभूतिपूर्वकं विचारं कृत्वा शीघ्रं कारवाही करोति, तर्हि अनेन शिक्षकाणां मनोबलं वर्धिष्यते तथा च ते विद्यालयानां विकासे अधिक-ऊर्जया योगदानं दातुं शक्ष्यन्ति।

# 'गज-परियोजनायाः' उद्देश्यं गजानां रक्षा, तेषाम् आवास-संरक्षणं तथा च समुदायानां मध्ये सह-अस्तित्वस्य वर्धनम्: भूपेन्द्रयादवः



विश्व-गज-दिवसस्य अवसरे पर्यावरण-वन-जलवायुपरिवर्तन-मन्त्री भूपेन्द्रयादवः अवदत् यत् 'गज-परियोजना' (प्रोजेक्ट एलिफेंट) भारतस्य गजानां रक्षां, तेषाम् आवासानां संरक्षणं तथा च गजानां समुदायानां च मध्ये सौहार्दपूर्ण-सह-अस्तित्वस्य प्रोत्साहनं प्रति प्रतिबद्धतां दर्शयति। सामाजिक-माध्यम-सन्देशे केन्द्रीयमन्त्री अवदत् यत् अस्यां परियोजनायां गजानां सुरक्षायै विविधाः उपायाः कार्यान्विताः क्रियन्ते, येषु प्रारम्भिक-चेतावनी-प्रणाली, कृत्रिम-बुद्धि-आधारित-सूचनाः (AI-Alerts), जनानां गजानां च सुरक्षायै सौर-ऊर्जा-सञ्चालिताः वृत्त-रोधकाः (फेन्सिंग) परिखाः च, तथा च कृषकेभ्यः शस्य-हानये समयबद्ध-क्षतिपूर्ति-प्रदानं समाविष्टम् अस्ति। श्रीयादवः अवदत् यत् रेल-विभागः अपि गजानां मृत्युं रोद्धुं महत्त्वपूर्ण-मार्गेशु (गुलियारेषु) चेतावनी-सङ्केतान्, कृत्रिम-बुद्धि-आधारित-समाधानानि तथा च गति-सीमाम् आयोजयति।

# हिमाचले स्वास्थ्य-सेवाभ्यः लप्स्यते नूतनः विस्तारः, 'एम्स'-बिलासपुर-संस्थानम् उत्कृष्टं विधातुं सज्जीकरणम्





हिमसंस्कृतवार्ता — बिलासपुरम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अवदत् यत् राज्यसर्वकारः अखिल-भारतीय-आयुर्विज्ञान-संस्थानस्य (AIIMS) बिलासपुरस्य सुदृढीकरणाय विस्तारीकरणाय च पूर्ण-सहयोगं प्रदास्यति। तेन उक्तं यत् 'एम्स'-बिलासपुर-संस्थानम् उत्कृष्टं स्वास्थ्य-संस्थानं रचयिष्यते, येन एतत् प्रदेशस्य जनेभ्यः श्रेष्ठ-सुविधाः उपलब्धं कारयितुम् अधिकं समर्थं भवेत्। बिलासपुर-जनपदस्य एक-दिवसीय-प्रवास-काले मुख्यमन्त्री 'एम्स'-संस्थानं प्राप्तवान् तथा च चिकित्सकैः सह स्वास्थ्य-सेवाभिः सह अन्यानां विषयाणाम् उपरि विस्तृतां चर्चाम् अकरोत्। तेन प्रोक्तं यत् राज्यसर्वकारः चिकित्सा-महाविद्यालयान् इतोऽपि सुदृढां कर्तुम् सर्वसम्भव-प्रयासं करोति, येन दिसम्बर २०२६ दिनाङ्कं यावत् सर्वेषु चिकित्सा-महाविद्यालयेषु उपचाराय आगच्छद्भ्यः जनेभ्यः विश्वस्तरीय-स्वास्थ्य-सेवाः प्राप्ताः भवेयुः। तेन उक्तं यत् अनेन निश्चितं भविष्यति यत् प्रदेशवासिभ्यः उत्तमाय स्वास्थ्य-उपचाराय प्रदेशात् बहिः गन्तुम् आवश्यकता न भवेत्। मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् स्वास्थ्य-क्षेत्रे जनेभ्यः श्रेष्ठाः सेवाः उपलब्धं कारयितुं क्रान्तिकारिणः निर्णयाः गृह्यमाणाः सन्ति। चिकित्सकान् स्वास्थ्य-क्षेत्रेण सम्बद्धान् विशेषाज्ञान् च आकर्षयितुं राज्यसर्वकारः तेभ्यः श्रेष्ठं वेतनम् अन्यान् लाभान् च ददाति। तेन प्रोक्तं यत् चिकित्सकान् 'प्रोफेसर'-इति पदे नामाङ्कितुं (Designate) प्रदेशसर्वकारः मानदण्डेषु शिथिलता-अवसरं ददाति। मुख्यमन्त्रिणा उक्तं यत् सम्पूर्ण-प्रदेशे परीक्षण-सेवाः (Diagnostic Services) अपि सुदृढाः क्रियमाणाः सन्ति। तेन प्रोक्तं यत् आई.जी.एम्.सी.-शिमला तथा च ए.आई.एम.एस.एस.-चमियाना-मध्ये '3-Tesla'-यन्त्राणि संस्थापितानि सन्ति। मण्डल-चिकित्सालये बिलासपुरं, कुल्लू, ऊना सोलन-मध्ये, मण्डल-चिकित्सालये किन्नौर-मध्ये, डॉ. वाई.एस. परमार-राजकीय-चिकित्सा-महाविद्यालये चिकित्सालये च नाहन-मध्ये, मण्डल-चिकित्सालये धर्मशालायां नागर-चिकित्सालये पालमपुरे च '1.5-Tesla MRI'-यन्त्राणि संस्थाप्यमाणानि सन्ति। तेन उक्तं यत् राज्यसर्वकारेण 'पीजी'-चिकित्सा-आसनेषु (PG Medical Seats) ३३० आसनानां वर्धनायाः लक्ष्यं स्थापितम्, येन राज्ये विशेषज्ञ-स्वास्थ्य-सेवाः दातुम् साहाय्यं भविष्यति। मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् राज्यसर्वकारेण 'जीन-थेरेपी' तथा च 'फोटो-थेरेपी'-क्षेत्रेषु कार्याणि आरब्धानि सन्ति तथा च 'यूनाइटेड-स्टेट्स'-देशस्य चिकित्सकैः सह तेषाम् विशेषज्ञतायै सहयोगाय च चर्चा क्रियमाणा अस्ति। अस्मिन् अवसरे नगर-ग्राम-नियोजन-मन्त्री राजेशधर्माणी, पूर्व-मन्त्री रामलालठाकुरः, पूर्व-विधायकः तिलकराजः, 'एम्स'-संस्थानस्य कार्यकारी-निदेशकः लेफ्टिनेंट-जनरल-डॉ.-दलजीतसिंहः, उपायुक्तः राहुलकुमारः अन्ये च वरिष्ठाः अधिकारिणः उपस्थिताः आसन्।

**मन्त्रिमण्डल-विस्तारात् पूर्वम् अकस्मात् देहलीं प्राप्तः मुख्यमन्त्री सुक्खू, शीर्ष-नेतृभिः सह करिष्यति मेलनम्**

> २१ अगस्त-दिनाङ्कात् विधानसभायाः मानसून-सत्रम्, उप-सभापतेः (Deputy Speaker) निर्वाचनम् अपि भविष्यति

> उप-मुख्यमन्त्री मुकेशअग्निहोत्री, प्रदेश-काङ्ग्रेस-समित्याः अध्यक्षः विनयकुमारः अपि देहल्यां सम्प्राप्तौ

हिमसंस्कृतवार्ता — शिमला: शिमला-तः बिलासपुर-प्रवासाय गतः मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अकस्मात् देहलीं प्रति प्रस्थितवान्। सः देहलीं प्राप्तवान् अस्ति दलस्य शीर्षनेतृत्वस्य (High Command) अनेकैः नेतृभिः सह मेलनं करिष्यति। बिलासपुर-प्रस्थानात् पूर्वम् शिमला-मध्ये मुख्यमन्त्रिणा उक्तम् आसीत् यत् मन्त्रिमण्डल-विस्तारः 'पॉलिटिकल-अफेयर्स-कमेटी' (PAC) इत्यस्याः उपवेशनात् पूर्वम् अपि भवितुम् अर्हति सुन्दरसिंहठाकुरः मन्त्रि-परिषदः शपथं ग्रहीतुं शक्नोति। तेन एते सङ्केताः अपि दत्ताः आसन् यत् मन्त्रिमण्डल-विस्तारेण सह मन्त्रिणां विभागानाम् परिवर्तनम् अपि सम्भाव्यम् अस्ति। इतः हिमाचलप्रदेश-विधानसभायाः मानसून-सत्रम् २१ अगस्त-दिनाङ्कात् प्रारभ्यते, यत् ३ सितम्बर-दिनाङ्क यावत् चलिष्यति। सम्प्रति विधानसभायाः अन्तः उप-सभापतेः (Deputy Speaker) पदं रिक्तम् अस्ति। अस्मिन् पदे पूर्वं रेणुका-क्षेत्रात् काङ्ग्रेस-विधायकः विनयकुमारः आसीत्। तेन प्रदेश-काङ्ग्रेस-समित्याः अध्यक्षे कृते सति एतत् पदं त्यक्तम् आसीत्। अस्मिन् मानसून-सत्रे उप-सभापतेः पदम् अपि पूरयिष्यते। मुख्यमन्त्रिणः पूर्वम् उप-मुख्यमन्त्री मुकेशअग्निहोत्री अपि देहल्यामेव आसीत् अद्य च तेन हिमाचल-काङ्ग्रेस-प्रभारिण्या रजनीपाटिल-वर्यायाः सह मेलनम् अपि कृतम् आसीत्। उप-मुख्यमन्त्रिणः पूर्वम् प्रदेश-काङ्ग्रेस-समित्याः अध्यक्षः विनयकुमारः अपि देहलीं प्रति प्रस्थितवान् आसीत् 'ऑल-इण्डिया-काङ्ग्रेस-कमेटी' इत्यस्याः सङ्घटन-महासचिवेन के.सी.वेणुगोपाल-वर्येण सह चर्चायै गतः आसीत्। अधुना मुख्यमन्त्रिणः अपि अकस्मात् देहली-प्रापणेन हिमाचले मन्त्रिमण्डल-विस्तारमधिकृत्य बहुभ्यः दिनेभ्यः प्रचलन्तीभ्यः उत्प्रेक्षाभ्यः इतोऽपि गतिः प्राप्ता। यद्यपि राज्यसर्वकारस्य पक्षतः प्रसारितेन कार्यक्रमानुसारेण मुख्यमन्त्रिणा अद्य बिलासपुर-तः शिमलां प्रति निवर्तनीयम् आसीत्। ततः १४ तथा १५ अगस्त-दिनाङ्के हमीरपुर-मण्डलस्य प्रवासः आसीत्। अधुना सः देहली-तः साक्षात् हमीरपुर-मण्डलम् अपि आगन्तुं शक्नोति।



# दैनिकवेतनभोगिनां नियमितीकरणाय अनुमतिः, २०० पदेषु भविष्यति नियुक्तिः, सभायां निर्णयः

हिमसंस्कृतवार्ताः- शिमला। राज्य- वननिगम-कर्मचारीमहासंघस्य प्रयत्नेन कर्मचारिभिः सम्बद्धानां बहूनां महत्त्वपूर्णविषयाणां समाधानदिशि सकारात्मकः प्रगतिः जाता अस्ति। महासंघस्य प्रतिनिधिमण्डलेन बुधवासरे शिमलायां वननिगमस्य उपाध्यक्षेन केहरसिंहखाची इत्यनेन प्रधान-अरण्यपालेन (वनबल- हिमाचलमुख्येन) डॉ. सञ्जयसूदेन च सह मिलित्वा कर्मचारिणां लम्बिताः याचनाः समस्याश्च विस्तरेण प्रस्तुताः। निगमस्य उपाध्यक्षः केहरसिंहखाची, डॉ. सञ्जयसूदः अवदतां यत् निगमस्य रिक्तपदानां पूर्तये शीघ्रमेव नियुक्तिप्रक्रिया प्रारप्स्यते। प्रायः १०० सहायकवनरक्षकाणां तथा प्रायः १०० वनवीराणां नियुक्तिः भविष्यति। महासंघेन वननिगमकर्मचारिभ्यः पुरातनवेतनवृत्तियोजनायाः (ओपीएस) पुनर्स्थापनस्य पक्षः अपि उत्थापितः। कर्मचारिणां सामाजिक-आर्थिकसुरक्षायै ओपीएस पुनर्स्थापनीयम् इति महासंघेन कथितम्। अस्मिन् विषये खाची महासंघम् आश्वासितवान् यत् एषः महत्त्वपूर्णः विषयः मुख्यमन्त्रिणः समक्षं प्रभावीरूपेण प्रस्तुतः भविष्यति तथा कर्मचारिणां पक्षं सर्वकारपर्यन्तं प्रापयितुं पूर्णं सहयोगं प्रदास्यते। महासंघस्य अध्यक्षः प्रीतमपालठाकुरः तथा प्रधानः बाबूरामः इत्यनयोः नेतृत्वे आगतेन प्रतिनिधिमण्डलेन दैनिकवेतनभोगिकर्मचारिणां नियमितीकरणस्य विषयः प्रमुखतया उत्थापितः। महासंघस्य कथनम् आसीत् यत् दीर्घकालात् सेवां कुर्वन्तः कर्मचारी नियमितीकरणस्य प्रतीक्षां कुर्वन्ति।

## कर्मचारिणां न्यूनतायाः विषयः अपि उत्थापितः

महासंघेन वननिगमे निरन्तरं वर्धमानायाः कर्मचारिणां न्यूनतायाः विषयः अपि उत्थापितः। प्रतिनिधिमण्डलेन कथितं यत् क्षेत्रस्तरे पर्याप्तकर्मचारिणां अभावेन कार्यं प्रभावितं भवति। सभायां करुणामूलकाधारेण नियुक्तेः विषयः अपि प्रमुखतया उत्थापितः। महासंघेन कथितं यत् बहवः पात्रपरिवाराः वर्षेभ्यः नियुक्तेः प्रतीक्षां कुर्वन्ति, येन ते आर्थिक-सामाजिककठिनतां सम्मुखीकुर्वन्ति। प्रतिनिधिमण्डलेन लम्बितप्रकरणानां शीघ्रनिस्तारणस्य, पात्राश्रितानां शीघ्रनियुक्तेः च याचना कृता। अधिकारिभिः अस्मिन् विषये सहानुभूतिपूर्वकं विचारं कृत्वा आवश्यककार्यविधिं सुनिश्चितुं विश्वासः प्रदत्तः। सभायां महासंघस्य महासचिवः विक्रान्तकडसोली, वरिष्ठोपाध्यक्षः कानचन्दठाकुरः, उपाध्यक्षः पङ्क्तिलठाकुरः सावडा, जगतरामः, कोषाध्यक्षः विकासः, अर्जुनसिंहः तथा श्यामलालः उपस्थिताः आसन्।

# मुख्यमन्त्री सुक्खू बिलासपुरस्य १५०० धीवरेभ्यः व्यतरत् ५२.५० लक्ष-रूप्यकाणि, अर्थदण्डक्षमापनेन सह अनेकाः घोषणाः

हिमसंस्कृतवार्ता — बिलासपुरम्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः बिलासपुर-मण्डलस्य झण्डूता-विधानसभा-क्षेत्रस्य प्रवास-काले 'मुख्यमन्त्री-धीवर-सम्मान-निधि-योजनायाः' अन्तः बिलासपुर-मण्डलस्य १५०० धीवरेभ्यः ३५०० रूप्यकाणि प्रति-लाभार्थी-दरेण आहत्य ५२.५० लक्ष-रूप्यकाणाम् राशिम् प्रत्यक्ष-लाभ-हस्तान्तरण-माध्यमेन (DBT) प्रेषितवान्। तेन धीवर-समितिषु आरोपितस्य पञ्च-गुणित-अर्थदण्डस्य क्षमापनं तथा च शीत-ग्रह-एककानाम् (Cold Storage Units) संस्थापनाय दीयमानाम् आर्थिक-साहाय्य-राशिं (Subvention) ७० प्रतिशतात् वर्धयित्वा ८० प्रतिशतं कर्तुम् घोषणा अपि कृता।

तेन सम्पूर्ण-प्रदेशे धीवरेभ्यः 'लाइफ-जैकेट'-सुरक्षा-वस्त्राणि उपलब्धं कारयितुम् ५० लक्ष-रूप्यकाणि धीवरेभ्यः 'लैंडिंग'-सुविधाः विकसितुम् १० लक्ष-रूप्यकाणि दातुम् घोषणा कृता। एतदतिरिच्य, झण्डूता-विधानसभा-क्षेत्रे १० सम्पर्क-मार्गाणाम् निर्माण-कार्याणि पूर्णं कर्तुं प्रत्येक-मार्गाय १०-१० लक्ष-रूप्यकाणि दातुम् घोषणा कृता। तेन राजकीय-स्नातक-महाविद्यालये झण्डूता-मध्ये 'बीसीए' 'बीबीए' कक्षाः प्रारब्धुम् घोषणा अपि कृता।

अस्मिन् अवसरे धराडसानी-मध्ये आयोजितां जनसभां सम्बोधयन् मुख्यमन्त्रिणा उक्तं यत् जनानाम् महत्वाकाङ्क्षाः श्रुत्वा तासाम् अनुरुपं नीतीनाम् निर्माणमेव 'व्यवस्था-परिवर्तनस्य' वास्तविकः सारः ध्येयश्च अस्ति। तेन प्रोक्तं यत् एकात् सामान्यात् परिवारात् मुख्यमन्त्रिपदं यावत् प्राप्तिकारणेन सः सामान्य-जनानाम् सम्मुखे आगच्छन्तीः कठिनताः अवगच्छति। तेन उक्तं यत् धीवराणाम् कठोरं परिश्रमं तेषाम् योगदानं च ध्याने निधाय राज्यसर्वकारेण तेषां कल्याणाय अनेके महत्त्वपूर्ण-निर्णयाः गृहीताः।

मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् जलाशयेभ्यः गृहीतानां मत्स्यानाम् उपरि राजदेयं (Royalty) वित्तीय-वर्षे २०२५-२६ मध्ये १५ प्रतिशतात् न्यूनीकृत्य ७.५० प्रतिशतं कृतम् आसीत् अधुना च एतत् इतोऽपि न्यूनीकृत्य केवलम् एकं प्रतिशतम् कृतम् अस्ति। तेन प्रोक्तं यत् प्रदेशे उत्पादितान् मत्स्यान् देहली-चण्डीगढ-सदृशेषु प्रमुख-विपणीषु प्रेषयितुम् राज्यसर्वकारः 'रेफ्रिजरेटेड'-वाहनानाम् क्रयणाय ७० प्रतिशतं साहाय्यं (Subvention) ददाति।





तेन उक्तं यत् धीवरेभ्यः श्रेष्ठं सुरक्षितं च जीवनं निश्चितं कर्तुम् सर्वकारः प्रमुखतया कार्यं करोति। अस्यां दिशि ग्रामीण-अर्थव्यवस्था सुदृढा क्रियमाणा अस्ति येन जनेभ्यः स्व-ग्रामेषु एव आजीविकायाः साधनानि उपलब्धानि भवेयुः।

मुख्यमन्त्रिणा उक्तं यत् पूर्वतन-भाजपा-सर्वकारस्य काले हिमाचलप्रदेशः गुणवत्तापूर्ण-शिक्षायाः विषये देशे २१-तमे स्थाने अपसृतः आसीत्। तेन प्रोक्तं यत् वर्तमान-राज्यसर्वकारस्य दृढ-प्रयासैः हिमाचलप्रदेशः अधुना छात्रेभ्यः गुणवत्तापूर्णां शिक्षां उपलब्धं कारयितुं विषये पञ्चमे स्थाने प्राप्तः अस्ति। तेन उक्तं यत् सर्वकारस्य प्रयासैः १५० 'सीबीएसई'-विद्यालयाः उद्घाटिताः, येषां परिणामस्वरूपे सर्वकारीय-विद्यालयेषु बालकानाम् प्रवेशे प्रायः २४,००० वृद्धिः पञ्जीकृता। तेन प्रोक्तं यत् राज्यसर्वकारेण दुग्धस्य मूल्येषु प्राकृतिक-कृष्या सज्जीकृतानाम् उत्पादानाम् न्यूनतम-समर्थन-मूल्येषु (MSP) ऐतिहासिक-वृद्धिः कृता अस्ति। तेन उक्तं यत् वनानाम् विस्तारं दातुम् रोपणाय च महिला-मण्डलेभ्यः युवक-मण्डलेभ्यः च अपि आर्थिकी सहायता दीयमाना अस्ति। तेन प्रोक्तं यत् अस्माकं सर्वकारस्य ध्येयमस्ति यत् ग्रामेषु वसन्तः जनाः स्व-ग्रामेषु एव आजीविकाम् अर्जयन्तु धनं च प्राप्नुयुः।

मुख्यमन्त्रिणा सुक्खू-महोदयेन उक्तं यत् राज्यसर्वकारेण भ्रष्टाचारस्य चौराणि द्वाराणि पिहितानि। सर्वकारस्य प्रयासैः रक्षितस्य धनस्य उपयोगः धीवराणाम् कल्याणाय तथा च निराश्रितानाम् अन्येषाम् आवश्यक-बालकानाम् उच्च-शिक्षायै साहाय्यं दात्रीणां योजनानाम् कार्यान्वयने क्रियमाणः अस्ति। तेन प्रोक्तं यत् उच्च-शिक्षां प्राप्नुवद्भ्यः छात्रेभ्यः केवलम् एक-प्रतिशत-वृद्ध्यङ्केन (ब्याज दर) शिक्षा-ऋणम् अपि उपलब्धं कार्यमाणम् अस्ति।

मुख्यमन्त्रिणा उक्तं यत् राज्यसर्वकारः 'एम्स'-नूतन-देहल्याः रीत्या प्रदेशस्य सर्वकारीय-चिकित्सा-महाविद्यालयेषु विशेषज्ञ-स्वास्थ्य-सेवाः उपलब्धं कारयति। तेन प्रोक्तं यत् 'रोबोटिक-सर्जरी'-सहिताः उन्नताः चिकित्सा-सुविधाः जनेभ्यः अधुना प्रदेशे एव उपलब्धाः क्रियमाणाः सन्ति। प्रदेशसर्वकारः आपदा-प्रभावितेभ्यः परिवारेभ्यः स्वकीय-संसाधनेभ्यः अष्ट-लक्ष-रूप्यकाणां साहाय्यम् अपि ददाति। सर्वकारः एतत् निश्चितं करोति यत् जनतायाः धनस्य उपयोगः जनानां कल्याणाय भवेत्। तेन उक्तं यत् यदि केनचित् जनेन भ्रष्टाचारेण सम्पत्तिः अर्जिता अस्ति, तर्हि सर्वकारः नियमानुसारं कार्यविधिं करिष्यति। तेन जनेभ्यः भ्रष्टाचारस्य विरुद्धं युद्धे सहयोगं कर्तुम् आह्वानं कृतम्।

# बालभारती-पब्लिक- स्कूल इत्याख्ये विद्यालये संस्कृतगीत-गानप्रतियोगितायाः आयोजनम्, संस्कृतमयः जातः परिसरः







नवदेहली: गङ्गाराम-चिकित्सालय-मार्गस्थस्य बालभारती- पब्लिक- स्कूल इत्याख्यस्य प्रशासनेतर-विद्यालयस्य माध्यमिकविभागेन स्वाधीनतादिवसम् उपलक्ष्य अन्तःसदनीय- गतिविधेः अन्तर्गतम् देशभक्ति- संस्कृत- गीतगान- प्रतियोगितायाः सफलमायोजनं कृतम्। विद्यालयस्य माध्यमिकविभागस्य पुस्तकालयपरिसरे आयोजितेऽस्मिन् कार्यक्रमे षष्ठीतः अष्टमीकक्षा-पर्यन्तस्य छात्रैः महता उत्साहेन देशभक्तिभावेन च स्वप्रस्तुतयः दत्ताः। तत्रापि पद्मश्रिया सभाजितस्य त्रिवेणीकवेः अभिराज राजेन्द्रमिश्रवर्यस्य "वन्दे सशक्तदेशम्" इति गीतस्य स्वर-लय-ताल-पुरस्सरं छात्रैः दत्तेन भव्यप्रस्तवनेन सभा मन्त्रमुग्धीभूता।

प्रतियोगितायाः मुख्यविषयः 'रिक्थस्य नवाचारस्य च मेलनम्' इति आसीत्। अस्मिन् अवसरे छात्रकलाकारैः "वन्दे सशक्तदेशम्" इति गीतं गीत्वा सम्पूर्णं वातावरणं राष्ट्रभक्तिमयं ऊर्जामयं च कृतम्। प्रतियोगितायां प्रत्येकमपि सदनात् षट् षट् प्रतिभागिभिः भागः गृहीतः, येभ्यः गानाय अधिकतमं ५ निमेषाणां समयः दत्तः आसीत्। अयं कार्यक्रमः प्राचीनसंस्कृतेः नवाचारस्य च सङ्गमः सिद्धः। संस्कृतभाषायाः महत्त्वं भारतीयसंस्कृतिं च वर्धयितुम् आयोजितस्य अस्य कार्यक्रमस्य ध्येयं संस्कारमयगीतेभ्यः स्वरप्रदानम् आसीत्।

अस्यां प्रतिस्पर्धायां निर्णायकत्वेन विद्यालयस्य एव संगीतशिक्षकः सुमनकुमारझाः, वरिष्ठः संस्कृतशिक्षकः डॉ. युवराज भट्टराई च उपस्थितौ आस्ताम्। अस्यां स्पर्धायां जवाहर सदनस्य छात्राः प्रथमस्थानम् अधिगतवन्तः। मदर टेरेसा सदनस्य छात्राः द्वितीये स्थाने विराजिताः। अशोक सदनस्य छात्राः तृतीयं स्थानम् अधिगतवन्तः। अथ च शिवाजी सदनस्य छात्राः सान्त्वनापुरस्कारं प्राप्तवन्तः। कार्यक्रमस्य अन्ते विजेतृछात्रेभ्यः प्रमाणपत्राणि अपि वितरितानि।

अस्मिन् अवसरे भाषणं कुर्वता डॉ. युवराज भट्टराईवर्येण प्रोक्तं यत् संस्कृतं नः संस्कृतेः आत्मा अस्ति, संगीतं च अस्माकं मूल्यानां स्वरः अस्ति। छात्राणां मधुरस्वरैः आत्मविश्वासेन च उपस्थितानां शिक्षकाणां श्रोतॄणां च मनांसि जितानि। कार्यक्रमस्य आयोजने वरिष्ठसंस्कृतशिक्षिका डॉ ज्योत्स्ना श्रीवास्तववर्यायाः डॉ. वीरेन्द्रकुमारस्य च विशेषं योगदानम् अवर्तत। समग्रमपि कार्यक्रमजातं मुख्याध्यापिकायाः नीता निझ्झारा वर्यायाः मार्ग दर्शने सम्पन्नम् अभूत्।

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये

# राष्ट्रियग्रन्थपालदिवसोत्सवस्य प्रतिवेदनम्






हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः

कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये २०२६ तमस्य वर्षस्य अगस्तमासस्य १२ दिनाङ्के महता उत्साहेन आदरेण च राष्ट्रियग्रन्थपालदिवसः आचरितः। भारतस्य ग्रन्थालयविज्ञानस्य पितुः डॉ. एस. आर. रङ्गनाथनस्य १३४ तमजन्मजयन्तीं संस्मर्तुम् अयं दिवसः प्रतिवर्षं मान्यते। अयं समारोहः विश्वविद्यालयस्य सभाभवने अभवत्, भूयसा साफल्येन च सम्पन्नः।

**२. उपस्थिताः मान्याः अतिथयः-**

अस्मिन् कार्यक्रमे विश्वविद्यालयस्य सर्वे उच्चाधिकारिणः उपस्थिताः आसन्। मञ्चे उपविष्टाः मान्याः अतिथयः यथा- माननीयः कुलपतिमहोदयः प्रो प्रह्लाद रा जोशीवर्यः

माननीया उपकुलपतिमहोदया प्रो मल्लिका कलिता

माननीयः कुलसचिवमहोदयः डॉ मनोज कुमार शर्मा

माननीयः कोषाध्यक्षमहोदयः एस बरठाकुरः

माननीयः परीक्षानियन्त्रकमहोदयः डॉ प्रशान्त ज्योतिगौतमः एतैः सह विद्यापीठस्य सङ्कायप्रमुखाः, वरिष्ठाः प्राध्यापकाः, अनुसन्धातारः, बहवः छात्राः च उपस्थिताः आसन्। तेषाम् उपस्थितिः डॉ. रङ्गनाथनस्य योगदानं प्रति विश्वविद्यालयस्य गौरवम्, शिक्षायां ग्रन्थालयस्य महत्त्वं च प्रादर्शयत्। ३. कार्यक्रमस्य संयोजनं सञ्चालनं च विश्वविद्यालयस्य ग्रन्थपालेन डॉ. राजीवकुमारदासेन कृतम्। सः सर्वेषां मान्यानां मञ्चस्थानां चातिथीनां स्वागतं कृत्वा कार्यक्रमस्य प्रारम्भम् अकरोत्।

ततः परम् एतस्य दिवसस्य आयोजनस्य औचित्यम् अधिकृत्य सः विचारगर्भितं भाषणम् प्रस्तुतवान्। सः डॉ. रङ्गनाथनस्य प्रसिद्धान् 'ग्रन्थालयविज्ञानस्य पञ्चनियमान्' प्रतिपाद्य अद्यतनयुगे अपि तेषां प्रासङ्गिकतां स्पष्टीकृतवान्। तेन 'कृत्रिमबुद्धेः युगे ग्रन्थालयकार्यकर्तॄणां परिवर्तमाना भूमिका' इति विषयः अपि चर्चितः। सः अकथयत् यत् पूर्वं ग्रन्थपालाः केवलं पुस्तकानां रक्षकत्वेन, आयोजकत्वेन च दृश्यन्ते स्म। परन्तु अधुना कृत्रिमबुद्धेः नवप्रविधीनां च साहाय्येन ते सूचनाप्रबन्धकाः मार्गदर्शकाः च जाताः सन्ति। सः अवदत् यत् सूचनायाः शीघ्रान्वेषणे वर्गीकरणे च कृत्रिमबुद्धिः सहायिका भवितुं शक्यते, किन्तु पाठकानाम् आवश्यकतानां अवगमने सम्यक्पुस्तकचयने च मानवीयस्पर्शः सर्वदैव महत्त्वपूर्णः स्थास्यति। तस्य भाषणं बहुज्ञानप्रदं सर्वेषां कृते चिन्तनीयं च आसीत्।

## ४. अतिथीनां सम्भाषणानि-

ग्रन्थपालस्य सम्भाषणानन्तरं मान्याः अतिथयः स्वकीयान् महत्त्वपूर्णान् विचारान् प्रास्तुवन्- माननीयः कुलपति-महोदयः प्रेरणादायकं भाषणम् अयच्छत्। सः अस्माकं जीवने पुस्तकानां ग्रन्थालयानां च महत्त्वम् अवदत्। सः अकथयत् यत् ग्रन्थालयः विश्वविद्यालयस्य हृदयमिव भवति। दुर्लभ-संस्कृत-पाण्डुलिपीनां संरक्षणे तासां शोधार्थिभ्यः उपलब्धतायाः सम्पादने च ग्रन्थालयकर्मचारिणां परिश्रमस्य भृशं प्रशंसा कृता। सः सर्वान् पठनवयस्य वर्धनाय ग्रन्थालयस्य सदुपयोगाय च प्रेरितवान्।

माननीया उपकुलपति-महोदया प्राचीनज्ञानस्य आधुनिकप्रविधिना सह संयोजनस्य आवश्यकताम् प्रतिपादितवती। प्राचीनग्रन्थानाम् अङ्कीकरणाय ग्रन्थालयस्य प्रयत्नान् सा अशंसत्। माननीयः कुलसचिवः अपि स्वविचारान् प्राकटयत्। सर्वैः वक्तृभिः अध्यापने, अध्ययने, अनुसन्धाने च ग्रन्थालयस्य योगदानं रेखाङ्कितम्। ते ग्रन्थालयदलस्य निष्ठापूर्णसेवायै धन्यवादं विहितवन्तः। सर्वाणि सम्भाषणानि अतीव ज्ञानवर्धकानि आसन्, प्रेक्षकांश्च ग्रन्थालयस्य तद्विषयाणां च आदरार्थं प्रा॓रयन्।

**५. विशेषक्षणः- ग्रन्थालयतन्त्रांशस्य उद्घाटनम्-**

कार्यक्रमस्य अतिशयः उत्साहजनकः भागः एकस्य नवीनतन्त्रांशस्य अनावरणम् आसीत्। ग्रन्थपालः डॉ. राजीवकुमारदासः स्वयमेव ग्रन्थालयस्य कृते "ग्रन्थालय- द्वारप्रवेशपञ्जिका- तन्त्रांशम्" विकसितवान् आसीत्। एषः तन्त्रांशः ग्रन्थालयान्तः गच्छतां आगच्छतां च जनानाम् अङ्कीय-अभिलेखात् रक्षणार्थं निर्मितः।

माननीयः कुलपतिमहोदयः सङ्गणकस्य गण्डं निपीड्य एतस्य तन्त्रांशस्य औपचारिकम् उद्घाटनम् अकरोत्। उपस्थितैः सर्वैः एषः प्रयासः श्लाघितः यतो हि एतेन ग्रन्थालयसेवासु सुधाराय ग्रन्थपालस्य तान्त्रिककौशलं दृश्यते। एषा नूतना प्रणाली आगन्तुकसंख्यायाः गणने, सुरक्षापालने, विवरणपत्रस्य निर्माणे च सुकरा भविष्यति। अस्माकं विश्वविद्यालयस्य कृते एषा गर्वस्य वार्ता यत् तादृशः तन्त्रांशः अस्माकं ग्रन्थपालेन स्वयमेव विकसितः।

## ६. धन्यवादार्पणं समापनञ्च-

कार्यक्रमस्य समापनं धन्यवादार्पणेन अभवत्। ग्रन्थपालः सर्वेषां मान्यानां अतिथीनां, प्राध्यापकानां, शोधार्थिनां, छात्राणां च तेषाम् उपस्थित्यै सहयोगाय च कार्तज्ञ्यं प्राकटयत्। तेन कार्यक्रमस्य आयोजनाय ग्रन्थालयकर्मचारिणां परिश्रमः अपि धन्यवादैः स्मृतः। एषः उत्सवः महता साफल्येन सम्पन्नः। डॉ. एस. आर. रङ्गनाथनस्य गौरवपूर्णस्मरणस्य ग्रन्थालयविज्ञानस्य उज्ज्वल- भविष्यापेक्षणस्य च एषः सुन्दरः सङ्गमः आसीत्। एतेन कार्यक्रमेन सर्वे स्मारिताः यत् ग्रन्थालयाः केवलं पुस्तकमयानि भवनानि न सन्ति, अपि तु ते ज्ञानस्य, अध्ययनस्य, नवोन्मेषस्य च साक्षात्स्थानानि सन्ति।

छात्रलोकः

# गजः मम मित्रम्

एकदा कश्चन मनुष्यः वनमार्गेण कुत्रचित् गच्छति स्म। तदा सहसा तस्य पुरतः कश्चन गजः दृष्टः यः तस्य एकं पादम् उत्थाप्य त्रिभिः पादैः चलति स्म। तं मनुष्यं दृष्ट्वा सः गजः तस्य एकं पादम् उत्थाप्य पुनः पुनः तं दर्शयति स्म। सः मनुष्यः गजस्य तादृशं व्यवहारं दृष्ट्वा अवागच्छत् यत् तस्य किमपि अभवत्, किन्तु सः तु वन्यप्राणी। वन्यप्राणी तु हिंस्रः भवति इत्यपि विचिन्त्य सः मनुष्यः तस्य समीपं गन्तुं नेच्छति स्म। परन्तु सः गजः तस्य पुरतः बहुकालं यावत् तथैव स्थित्वा तस्य एकं पादम् उत्थाप्य तं दर्शयति स्म। ततः साहसं कृत्वा अन्ततः तस्य गजस्य समीपं गत्वा सः मनुष्यः अपश्यत्, गजस्य पादे कश्चन काष्ठखण्डः अविध्यत, ततः च रुधिरं निर्गच्छति स्म। एतेन गजः अत्यन्तं कष्टम् अनुभवति इति विचार्य सः मनुष्यः गजस्य पादात् तं काष्ठखण्डं निष्कास्य आनयत्।



हिमसंस्कृतवावार्ताः, प्रदीपनाथः

ततः गजः तस्मात् कष्टात् मुक्तिं प्राप्य अत्यन्तं सन्तुष्टः तस्य तुण्डेन मनुष्यस्य मस्तकं स्पृष्ट्वा पुनः वनं प्राविशत्। ततः प्रायः विंशतेः वर्षेभ्यः परं सः मनुष्यः कुटुम्बैः सह भ्रमणार्थं पशुवाटिकाम् अगच्छत्। पशुवाटिकायाः परिदर्शनसमये यदा ते गजानां समीपम् अगच्छन् तदा पिञ्जरे स्थितेषु गजेषु कश्चन गजः तं मनुष्यं दृष्ट्वा तस्य एकं पादम् उत्थाप्य दर्शयति स्म। गजस्य तादृशं वृत्तं दृष्ट्वा सः मनुष्यः विंशतेः वर्षेभ्यः पूर्वं घटितां घटनां स्मृत्वा अचिन्तयत्, एषः एव सः गजः स्यात् यस्य अहं साहाय्यम् अकरवम् इति। ततः सन्तुष्टः सः मनुष्यः अन्यत् किमपि चिन्तनं विना हि कूर्दित्वा गजानां पिञ्जरं प्रविश्य तस्य गजस्य समीपम् अगच्छत्। तदा समीपे आगतं तं मनुष्यं दृष्ट्वा गजः तस्य तुण्डेन तं गृहीत्वा उपरि उत्थाप्य सबलेन भूमौ अपातयत्। गजस्य आघातेन सः मनुष्यः महान् आहतः भूत्वा चिकित्सालये प्रविष्टः अभवत्।

मन्ये एषः गजः सः गजः नासीत्। अतः सर्वदा केवलं सकारात्मकम् अपि च उत्तमं विचिन्त्य किमपि कार्यं न कर्तव्यम्। सर्वदा शुभं चिन्तनीयम् इति तु सत्यं किन्तु सर्वदा सतर्केणापि भवितव्यम्।

# संस्कारभारत्याः 'भू-अलंकरण-कौशल-बोध' अन्तर्गतं द्विदिवसीया रङ्गोली-कार्यशाला सम्पन्ना



## बालभारती-पब्लिक-विद्यालये एनटीपीसी-दर्लिपाल्यां रङ्गोली- कला- प्रशिक्षणम्

हिमसंस्कृतवार्ता:- दर्लिपाली। बालभारती-पब्लिक-विद्यालये, एनटीपीसी- दर्लिपाल्यां दिनाङ्के ०७ अगस्ततः ०८ अगस्त २०२६ पर्यन्तं संस्कारभारत्याः 'भू- अलंकरण- कौशलबोध' इत्यस्य अन्तर्गतं द्विदिवसीया रङ्गोली- कार्यशाला उत्साहपूर्णवातावरणे सफलतया आयोजिता। कार्यशालायाः मुख्योद्देश्यं छात्रेषु छात्रासु च भारतीयलोककलायाः, सृजनशीलतायाः, पारम्परिक- कला- कौशलस्य प्रति रुचिं जागरूकतां च संवर्धयितुं, भारतीयसंस्कृतेः समृद्धां कलात्मकपरम्परां च परिचेतुम् आसीत्।
एषा कार्यशाला विद्यालयस्य प्राचार्या उन्नति जोशी महोदयायाः नेतृत्वे, चाइल्ड एजुकेशन सोसायटी- संस्थायाः अध्यक्षा मीनू गोस्वामी- महोदयायाः, सचिव- प्रबन्धिका नानू रेखी- महोदयायाः मार्गदर्शने, एनटीपीसी-दर्लिपाली-संस्थायाः सहयोगेन च सम्पन्ना अभवत्। कार्यशालायाः विशेषप्रशिक्षकरूपेण योगेश- येलुवे- महोदयः, गुजरातसर्वकारस्य राज्य- समन्वयकः, आमन्त्रितः आसीत्। तेन प्रतिभागिभ्यः संस्कारभारत्याः मूलोद्देश्यानां तथा भारतीय-कलासंस्कृतेः संरक्षणे संवर्धने च तस्याः महत्त्वपूर्णां भूमिकां विस्तरेण विवृण्वता जानकारी प्रदत्ता। येलुवे-महोदयः भारतीयपरम्परायां वर्णितानां चतुःषष्टिकलानां उल्लेखं कुर्वन् भू-अलंकरणस्य विशेषमहत्त्वं प्रतिपादितवान्। तेन उक्तं यत् रङ्गोली केवलं गृहादीनां शोभासंवर्धनस्य कला नास्ति, अपितु सा भारतीय-संस्कृतेः, लोकपरम्परायाः, सौन्दर्यबोधस्य, माङ्गलिकभावनानां सशक्ताभिव्यक्तिरपि अस्ति।
प्रशिक्षकेन प्रतिभागिभ्यः भू-अलंकरणस्य विविधाः प्रविधयः, पारम्परिकाः आकृतयः तथा माङ्गलिक-प्रतीकानि च व्यावहारिकरूपेण शिक्षितानि। विभिन्नानां चिह्नानां प्रतीकानां च सांस्कृतिकं महत्त्वं स्पष्टीकृत्य तेषां प्रयोगविधिरपि प्रदर्शिता। विशेषरूपेण पञ्चानाम् अङ्गुलीनां समुचितोपयोगेन रङ्गोली-निर्माणस्य पारम्परिक-विधिः प्रशिक्षिता।
प्रशिक्षकस्य मार्गदर्शने प्रतिभागिभिः स्वयमेव विविधाः रङ्गोल्यः निर्मिताः। तैः विभिन्नाः आकृतयः, रेखाः, बिन्दवः, प्रतीकानि तथा वर्ण- संयोजनानि च अभ्यासितानि। अनेन प्रशिक्षणेन प्रतिभागिनः अवगतवन्तः यत् पारम्परिक- रङ्गोली- कला केवलं तकनीकाधारिता नास्ति, अपि तु तस्यां प्रयुक्तानाम् आकृतीनां प्रतीकानां च विशिष्टं सांस्कृतिकं महत्त्वं विद्यते।
कार्यशालायां विद्यालयस्य छात्राः छात्राश्च अभिभावकैः सह उत्साहपूर्वकं भागं गृहीतवन्तः। प्रतिभागिभिः पारम्परिकानाम्, आधुनिकानां च रङ्गोली-रचनानां प्रशिक्षणं प्राप्य स्वकीयां सृजनात्मक-प्रतिभां प्रदर्शिता। अनेन कार्यक्रमेण विद्यार्थिभ्यः अभिभावकेभ्यश्च एकत्रितरूपेण शिक्षितुं, सृजनात्मककार्यं कर्तुं तथा भारतीय- संस्कृत्या कलया च सह सम्बद्धुं रमणीयः अवसरः प्राप्तः। कार्यशालायाः अवसरस्य विविधैः वर्णैः, मनोहराभिः आकृतिभिः, पारम्परिक-रचनाभिः तथा माङ्गलिक-चिह्नैः आकर्षकाः रङ्गोल्यः निर्मिताः। अनेन प्रतिभागिषु सृजनात्मक-चिन्तनस्य, सौन्दर्यबोधस्य, धैर्यस्य, एकाग्रतायाः, सामूहिक- कार्यभावनायाः तथा हस्त-कौशलस्य च विकासः अभवत्। तदतिरिक्तं भारतीय- सांस्कृतिक- धरोहरस्य प्रति सम्मानभावस्य तथा तस्याः संरक्षणस्य चेतनायाश्च संवर्धनं जातम्।

**सततविकास-लक्ष्यैः सह सम्बन्धः**

अस्याः गतिविधेः सम्बन्धः संयुक्तराष्ट्रसंघस्य निम्नलिखितैः सततविकास-लक्ष्यैः सह आसीत्-
SDG 4- गुणवत्तापूर्ण-शिक्षा- कार्यशालायाः माध्यमेन विद्यार्थिभ्यः कक्षायाः बहिः व्यावहारिकं कौशलाधारितं च शिक्षणं प्राप्तम्।
SDG 5- लैङ्गिक-समानता-छात्रेभ्यः छात्राभ्यश्च समानरूपेण कला-कौशलं ज्ञातुं स्वप्रतिभां च प्रदर्शयितुम् अवसरः प्रदत्तः।
**SDG 8- सम्मानजनकं कार्यं तथा आर्थिकविकासः-** पारम्परिक-कला-कौशलयोः प्रति जागरूकतां वर्धयित्वा सृजनात्मकानां कौशलाधारितानां च सम्भावनानां प्रोत्साहनं कृतम्।
**SDG 11- सतत्-नगराणि तथा समुदायाः-** भारतीय-सांस्कृतिक-धरोहरस्य तथा पारम्परिक-कलानां संरक्षणे संवर्धने च योगदानं प्रदत्तम्।
**SDG 17- लक्ष्यार्थं सहभागिता-** विद्यालयस्य, अभिभावकानां तथा बाह्य- कला-विशेषज्ञस्य परस्पर-सहयोगेन एषा गतिविधिः सफलतया आयोजिता।
द्विदिवसीया एषा रङ्गोली-कार्यशाला विद्यार्थिनां अभिभावकानां च कृते ज्ञानवर्धिका, सृजनात्मिका तथा सांस्कृतिकदृष्ट्या समृद्धः अनुभवः अभवत्। अनेन आयोजनेन भारतीय-पारम्परिक-कला नवपीढ्या सह संयोजयितुं, लोककलानां संरक्षणस्य भावनां संवर्धयितुं तथा 'शिक्षणेन सह सृजनम्' इति भावनां सुदृढीकर्तुं महत्त्वपूर्णं योगदानं प्रदत्तम्।

# डीपीएस-बोकारोस्य प्रतिभाशाली लक्ष्यवेधी आदित्यायुष्मानस्य द्विसुवर्ण-विजयः

- **षोडशे झारखण्ड- राज्य- स्तरीय- शूटिङ्ग- प्रतियोगितायाम् उत्कृष्टं प्रदर्शनम्- क्षेत्रीय- पूर्वराष्ट्रीय- प्रतियोगितयोः कृते चयनम्**

हिमसंस्कृतवार्ता:- सौरभः डे, बोकारो। दिल्ली-पब्लिक-विद्यालयस्य (डीपीएस) बोकारो इत्यस्य द्वादश-कक्षायाः प्रतिभाशाली युवा- राइफल-लक्ष्यवेधी आदित्यायुष्मानः षोडशे झारखण्ड-राज्यस्तरीय- शूटिङ्ग- प्रतियोगितायां उत्कृष्टं प्रदर्शनं कृत्वा विद्यालयस्य बोकारो-नगरस्य च गौरवं वर्धितवान्। पश्चिमबङ्गस्य आसनसोल- नगरे आयोजितायां अस्यां प्रतियोगितायां सः द्वे सुवर्णपदके एकं कांस्यपदकं च प्राप्तवान्। राज्यस्तरे निरन्तरं चतुर्थवर्षमपि स्वविजयपरम्परां कायमं स्थापयन् आदित्यायुष्मानः स्वस्य अद्वितीयं प्रतिभां प्रदर्शितवान्। राञ्ची, धनबाद, हजारीबाग तथा पूर्वसिंहभूमिः इत्यादीनां द्वादश-जनपदानां श्रेष्ठ-लक्ष्यवेधकैः सह स्पर्धमानः आदित्यायुष्मानः ओपन-साइट् ५० मीटर् राइफल-शूटिङ्ग पुरुष-व्यक्तिगत-वर्गे तथा ओपन-साइट ५० मीटर जूनियर राइफल-शूटिङ्ग व्यक्तिगतवर्गे च सुवर्णपदकं प्राप्तवान्। अपि च पीप-साइट ५० मीटर राइफल-शूटिङ्ग यूथ व्यक्तिगतवर्गे कांस्यपदकमपि प्राप्तवान्।



अस्य प्रभावशालिनः प्रदर्शनस्य फलस्वरूपं आदित्यायुष्मानः दशम- पूर्व- क्षेत्रीय- शूटिङ्ग- चैम्पियनशिप (पिस्टल/राइफल)-प्रतियोगितायै अर्हतां प्राप्तवान्। एषा प्रतियोगिता अगस्तमासस्य २५ दिनाङ्कतः ३० दिनाङ्कपर्यन्तम् आसनसोलनगरे आयोजयिष्यते। सः तदनन्तरं पंजाबराज्ये आयोजितायां अखिल- भारतीय जी.वी. मावलंकर- शूटिङ्ग- चैम्पियनशिप- प्रतियोगितायामपि भागं ग्रहीष्यति। एषा प्रतियोगिता राष्ट्रिय-स्तरीय-प्रतियोगितायाः पूर्वम् आयोजितासु प्रमुखासु पूर्व-राष्ट्रीय-प्रतियोगितासु अन्यतमा अस्ति। राज्यस्तरीया एषा प्रतियोगिता झारखण्ड- स्टेट- राइफल-असोसिएशन इत्यस्य आयोजनेन सम्पन्ना अभवत्। एषा संस्था नेशनल् राइफल- असोसिएशन ऑफ इण्डिया (NRAI) तथा झारखण्ड- ओलम्पिक-असोसिएशन इत्याभ्यां सम्बद्धा अस्ति।

**आदित्यायुष्मानस्य महत्त्वपूर्ण-सफलतायै तस्य अभिनन्दनं कुर्वन् विद्यालयस्य प्राचार्यः डा. ए. एस. गङ्गवार महोदयः अवदत्-** "ओलम्पिक-क्रीडासु भारतस्य पदकप्राप्तेः प्रमुखेषु सम्भावितेषु क्रीडाक्षेत्रेषु लक्ष्यवेधन-क्रीडायाः महत्त्वपूर्णं स्थानम् अस्ति। विद्यार्थिषु अस्याः क्रीडायाः वर्धमानां रुचिं दृष्ट्वा विद्यालयेन 'अभिनव- बिन्द्रा-शूटिङ्ग-रेञ्ज' इति नाम्ना लक्ष्यवेधन- प्रशिक्षणकेन्द्रस्य स्थापना कृता अस्ति। जनपदस्तरे विद्यालये स्थापितं एतादृशं प्रथमं प्रशिक्षणकेन्द्रमिदम् अस्ति।"

# कूटौषधि-प्रकरणे एफ़एसडीए-संस्थायाः महती प्रक्रिया, चतुर्णां विरुद्धम् एफ.आई.आर. पञ्जीकृता





**लखनऊनगरम्, १२ अगस्तमासः ।**
कूट-संदिग्ध-औषधीनां सम्पूर्ति-शृङ्खलायाः विरुद्धं प्रदेशसर्वकारः कठोरतया व्यवहरति। एतस्मिन्नेव क्रमे उत्तरप्रदेशस्य खाद्यसुरक्षा-औषधि-प्रशासनेन (एफएसडीएविभागद्वारा) बुधवासरे लखनऊनगरे अन्यस्य बृहतः सञ्जालं भङ्गं कुर्वता महती विधि-प्रक्रिया सम्पादिता।

विभागस्यानुसारम्, अमीनाबाद-क्षेत्रे वास्तविकानाम् औषधीनां सम्पूर्तिं विना कूट-अभिलेखैः, छद्म-विपणनेन, केवलं कर्गलेषु एव वित्तीय-व्यवहारेण च कूटौषधीनां विक्रयणस्य क्रीडा प्रचलति स्म। अस्मिन् प्रकरणे चतुर्णामभियुक्तानां विरुद्धम् अमीनाबाद-आरक्षीस्थाने भारतीय-न्याय-संहितायाः (बीएनएस) विविधाभिः धाराभिः एफ.आई.आर. अभिलिखिता।

एफ.आई.आर-प्रकरणे अंकुर-अवस्थी (हेल्थ-प्लस-संस्थायाः स्वामी), मनीष-बाजपेयी (एम.के. फार्मा-संचालकः), गोविन्द-शुक्लः (राम-फार्मा-संचालकः), एजाज-अहमदः (पेशेंट-केयर-सर्जिकल-हाउस, सहारनपुर-संचालकः) च अभियुक्ताः कृताः। एताभिः संस्थाभिः वास्तविकानाम् औषधीनां प्रेषणं विना परस्परं छद्म-पत्रकाणि निर्मितानि, केवलं कर्गलेषु एव क्रय-विक्रयणयोः अभिलेखाः रचिताः इति आरोपः अस्ति।

## अनुज्ञापत्रं विना औषध-व्यापारस्य आरोपः

विभागस्यानुसारम्, अमीनाबादस्थस्य 'हेल्थ-प्लस' संस्थायाः स्वामी अंकुर-अवस्थी वैध-अनुज्ञापत्रं विना बृहत्परिमाणे औषधीनां सञ्चयस्य आदानप्रदानस्य च कूट-अभिलेखान् रचितवान्। अन्वेषणे गोविन्द-शुक्लस्यापि भूमिका स्पष्टा अभवत्, यः अस्याः संस्थायाः मुख्य-प्रबन्धकः आसीत्। अन्वेषणानुसारं 'हेल्थ-प्लस' तथा 'राम-फार्मा' इत्येते उभे अपि संस्थाने एकस्मिन्नेव तले संचालितौ आस्ताम्। एताभ्यां माध्यमेन औषधीनाम् अवैध-अभिलेख-परिवर्तनस्य सञ्जालः चाल्यते स्म। सहारनपुरस्य 'पेशेंट-केयर-सर्जिकल-हाउस' इति संस्था, या गतेभ्यः द्वाभ्यां वर्षाभ्यां स्थगिता आसीत्, तस्याः उपयोगः अपि कूट-क्रयस्य कर्गद-भ्रमणाय कृतः।

## ८.८७ कोटि-रूप्यकाणां क्रयस्य स्वत्वम्

अस्मिन् प्रकरणे 'एम.के. फार्मा' संस्थायाः भूमिका अपि अन्वेषणस्य परिधौ अस्ति। विभागस्यानुसारम्, अस्याः संस्थायाः संचालकः मनीष-बाजपेयी वित्तीयवर्षे २०२६ प्रायः ८.८७ कोटि-रूप्यकाणाम् औषधीनां क्रयं दर्शितवान्। अन्वेषणकाले विभागाय एतादृशाः अभिलेखाः प्राप्ताः, येषु अन्यासां संस्थानां नाम्नि Zoryl M1, Augmentin, Dexorange Syrup इत्येतेषां क्रयः दर्शितः आसीत्। साक्ष्य-गोपनाय गणकयन्त्रस्य (लैपटॉप) पुरातन-दत्तांशः (विवरणं) अपि विलोपितः। यदा औषधि-निर्मातृ-संस्थाभिः सह अस्य सत्यापनं कृतम्, तदा ताभिः एतासाम् औषधीनां विक्रयः पूर्णतया प्रत्याख्यातः तथा च सम्बद्धाः समूहाः कूट-औषधयः इति घोषिताः।

## ३९.२० लक्ष-मात्रायाः Zoryl M1 औषधेः विवरणं न प्राप्तम्

अन्वेषणे एम.के. फार्मा-संस्थायाः पार्श्वे Zoryl M1 औषधेः प्रायः ३९.२० लक्ष-मात्राणां कश्चिद् विवरणं न प्राप्तम्। एताः औषधयः अवैधरीत्या विपणौ विक्रीताः, येन जनानां स्वास्थ्याय प्राणेभ्यश्च गम्भीरः सङ्कटः उत्पन्नः। एफ़एसडीए-अधिकारिणाम् अनुसारं, सम्पूर्णे प्रकरणे कूट-अभिलेख-निर्माणस्य, छद्म-रचनायाः, कूटौषध-व्यापारस्य, अवैध-धनाकर्षणस्य च आशङ्कायाम् अन्वेषणं प्रचलति। अनेनैव आधारेण चतुर्णाम् अभियुक्तानां विरुद्धं बीएनएस-संहितायाः १११, २७६, २७७, २७८, ३१८, ३१९, ३३६, ३३८ इति धाराणाम् अन्तर्गतं कानूनी-प्रक्रिया कृता।

## अनुज्ञापत्र-निरस्तीकरणं, मध्यस्थानामपि उपरि भविष्यति विधिप्रक्रिया

विभागेन कूटौषधीनां सम्पूर्ति-शृङ्खलायाः भङ्गाय राज्यभरे तीव्र-निरीक्षणस्य निर्देशाः दत्ताः। खाद्यसुरक्षा-औषधि-प्रशासनस्य आयुक्तः डॉ. रोशन-जैकब महोदया सर्वभ्यः जनपदेभ्यः औषधि-निरीक्षकान् निर्दिष्टवती यत् अन्ताराज्यीय-सञ्जालैः सह सम्बद्धाः व्यापारिणः, स्थानीयाः थोक-विक्रेतारः, मध्यस्थाः च निरन्तरं निरीक्षणे स्थापनीयाः। अन्वेषणे ये अपि दोषिणः प्राप्यन्ते, तेषां व्यापार-अनुज्ञापत्राणि निरस्तानि करिष्यन्ते तथा च तेषां विरुद्धं आपराधिक-अभियोगः चालयिष्यते।

# लौकिकन्यायकोशः

## चालनीन्यायः

यदा चालन्या धान्यं चाल्यते तदा अनावश्यकपदार्थाः उपरि तिष्ठन्ति आवश्यकमेव अधः पतति। यथा चालनी अनावश्यकं पृथक् कृत्वा सारमेव ददाति तथा सारवद्- वस्तु- ग्रहणस्य विषये अयं न्यायः प्रवर्तते। विवेकिनः जनाः सारं गृहीत्वा असारं त्यजन्ति इति अस्य आशयः।



# वार्ता-संवादः

**नन्दिनी** - नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतम् व्याहरामि। नमस्ते काव्ये।

**काव्या** - नमस्ते नन्दिनि। देहल्याम् एका विचित्रा घटना दृष्टा। एकेन अमेरिकीय-जनेन वञ्चक-दूरभाष- केन्द्रोपरि आक्रमणम् कृतम्।

**नन्दिनी**- आम्! सः अमेरिकीय-जनः पीत-सामुद्रिक- फेन- वेषधारिणः जनान् तत्र नीतवान् अस्ति। तैः तत्र नर्तनम् कृतम्, सर्वत्र कोलाहलः च उत्पादितः।

**काव्या** - अहो! अतीव हास्यास्पदम् खलु एतत्। अपरा वार्ता अपि विस्मयकरी अस्ति। अन्तर्जाले एका असत्या वार्ता प्रसारिता। "अद्य पृथिव्याः गुरुत्वाकर्षणशक्तिः सप्तक्षणपर्यन्तं नष्टा भविष्यति" इति कैश्चित् उक्तम्।

**नन्दिनी**- सत्यम्, जनाः अन्तर्जाले अन्धविश्वासयुक्ताम् वार्ताम् प्रसारितवन्तः सन्ति। परन्तु सा मिथ्या-वार्ता वैज्ञानिकानाम् खण्डनेन निवारिता।

**काव्या**- आम्, जनाः विना किमपि प्रमाणम् विश्वसन्ति। इदानीम् तमिळनाडु-राज्यस्य वार्ताम् शृणु। तत्र तैल-विक्रय-केन्द्र-स्वामिभिः अङ्कीय-धन- प्रदानस्य बहिष्कारः घोषितः।

**नन्दिनी**- आम्, तस्य कारणम् तु आरक्षकैः कृतानि प्राभातिक-अन्वेषणानि सन्ति। यैः ग्राहकैः अङ्कीयमाध्यमेन धनं दत्तं, तेषाम् अपराधकारणेन निर्दोषाणाम् स्वामिनाम् वित्तकोश-खातानि अवरुद्धानि। अतः तैः कुपितैः स्वामिभिः तर्जनम् दत्तम्।

**काव्या**- अहो! तैल-स्वामिनाम् कष्टम् तु बोधगम्यम्। नव-देहल्यां विधानसभायां तु अन्यदेव नाटकं जातम्। तत्र षड् विधायकाः सभा-प्रमुखेन बहिष्कृताः।

**नन्दिनी**- आम्, तैः विधायकैः विरोध- वाक्य-युक्तानि कञ्चुकानि धृतानि। यदा तानि कञ्चुकानि निष्कासयितुम् सभापतिना आदेशः दत्तः, तदा तैः आदेशः न पालितः। अतः एव ते रक्षकाणाम् साहाय्येन निष्कासिताः।

# सामान्यज्ञान-प्रश्नोत्तरी

१. प्रश्नः: कः ग्रहताराणां राजा इति कथ्यते?
उत्तरम्: सूर्यः ग्रहताराणां राजा इति कथ्यते।
२. प्रश्नः: संस्कृतभाषायाः जनकः कः अस्ति?
उत्तरम्: महर्षिः पाणिनिः संस्कृतव्याकरणस्य (भाषायाः च) जनकः अस्ति।
३. प्रश्नः: अस्माकं राष्ट्रियपुष्पं किम् अस्ति?
उत्तरम्: अस्माकं राष्ट्रियपुष्पं कमलम् अस्ति।
४. प्रश्नः: रामायणस्य रचयिता कः अस्ति?
उत्तरम्: रामायणस्य रचयिता महर्षिः वाल्मीकिः अस्ति।
५. प्रश्नः: पृथिव्याः समीपतमो ग्रहः कः वर्तते?
उत्तरम्: पृथिव्याः समीपतमो ग्रहः शुक्रः वर्तते।
६. प्रश्नः: कति वेदाः सन्ति, तेषां नामानि कानि?
उत्तरम्: चत्वारः वेदाः सन्ति— ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च।
७. प्रश्नः: कः पशूनां राजा इति प्रसिद्धः अस्ति?
उत्तरम्: सिंहः पशूनां राजा इति प्रसिद्धः अस्ति।
८. प्रश्नः: महाभारते कति अध्यायाः (पर्वाणि) सन्ति?
उत्तरम्: महाभारते अष्टादश (१८) पर्वाणि सन्ति।
९. प्रश्नः: भारतस्य राष्ट्रियनदी का अस्ति?
उत्तरम्: भारतस्य राष्ट्रियनदी गङ्गा अस्ति।
१०. प्रश्नः: कः सूर्योदयस्य देशः इति नाम्ना जगत्याम् विख्यातः? उत्तरम्: जापान-देशः सूर्योदयस्य देशः इति